# Shri Bhairava Tandava Stotram

# શ્રીભૈરવતાણ્ડવસ્તોત્રમ્

## Document Information

Text title : bhairavatANDavastotram

File name : bhairavatANDavastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.coM

Proofread by : Gopal Upadhyay, PSA Easwaran

Latest update : January 15, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2024

*sanskritdocuments.org*

# શ્રીભૈરવતાણ્ડવસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।
શ્રીગુરવે નમઃ ।
શ્રીભૈરવાય નમઃ ॥

અથ શ્રીભૈરવતાણ્ડવસ્તોત્રમ્ ।
ૐ ચણ્ડં પ્રતિચણ્ડં કરધૃતદણ્ડં કૃતરિપુખણ્ડં સૌખ્યકરં
લોકં સુખયન્તં વિલસિતવન્તં પ્રકટિતદન્તં નૃત્યકરમ્ ।
ડમરુધ્વનિશઙ્ખં તરલવતંસં મધુરહસન્તં લોકભરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં ભૈરવવેષં કષ્ટહરમ્ ॥ ૧॥

ચર્ચિતસિન્દૂરં રણભૂવિદૂરં દુષ્ટવિદૂરં શ્રીનિકરં
કિઙ્કિણિગણરાવં ત્રિભુવનપાવં ખર્પ્પરસાવં પુણ્યભરમ્ ।
કરુણામયવેશં સકલસુરેશં મુક્તસુકેશં પાપહરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેષં કષ્ટહરમ્ ॥ ૨॥

કલિમલસંહારં મદનવિહારં ફણિપતિહારં શીઘ્રકરં
કલુષં શમયન્તં પરિભૃતસન્તં મત્તદૃગન્તં શુદ્ધતરમ્ ।
ગતિનિન્દિતકેશં નર્તનદેશં સ્વચ્છકશં સન્મુણ્ડકરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેશં કષ્ટહરમ્ ॥ ૩॥

કઠિનસ્તનકુમ્ભં સુકૃતં સુલભં કાલીડિમ્ભં ખડ્ગધરં
વૃતભૂતપિશાચં સ્ફુટમૃદુવાચં સ્નિગ્ધસુકાચં ભક્તભરમ્ ।
તનુભાજિતશેષં વિલમસુદેશં કષ્ટસુરેશં પ્રીતિનરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેશં કષ્ટહરમ્ ॥ ૪॥

લલિતાનનચન્દ્રં સુમનવિતન્દ્રં બોધિતમન્દ્રં શ્રેષ્ઠવરં
સુખિતાખિલલોકં પરિગતશોકં શુદ્ધવિલોકં પુષ્ટિકરમ્ ।
વરદાભયહારં તરલિતતારં ક્ષુદ્રવિદારં તુષ્ટિકરં

ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેષં કષ્ટહરમ્ ॥ ૫॥

સકલાયુધભારં વિજનવિહારં સુશ્રવિશારં ભ્રષ્ટમલં
શરણાગતપાલં મૃગમદભાલં સઞ્જિતકાલં સ્વેષ્ટબલમ્ ।
પદનૂપૂરસિઞ્જં ત્રિનયનકઞ્જં ગુણિજનરઞ્જન કુષ્ટહરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેષં કષ્ટહરમ્ ॥ ૬॥

મર્દયિતુસરાવં પ્રકટિતભાવં વિશ્વસુભાવં જ્ઞાનપદં
રક્તાંશુકજોષં પરિકૃતતોષં નાશિતદોષં સન્મતિદમ્ ।
કુટિલભ્રુકુટીકં જ્વરધનનીકં વિસરન્ધીકં પ્રેમભરં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેષં કષ્ટહરમ્ ॥ ૭॥

પરિનિર્જિતકામં વિલસિતવામં યોગિજનાભં યોગેશં
બહુમદ્યપનાથં ગીતસુગાથં કષ્ટસુનાથં વીરેશમ્ ।
કલયન્તમશેષં ભૃતજનદેશં નૃત્યસુરેશં વીરેશં
ભજ ભજ ભૂતેશં પ્રકટમહેશં શ્રીભૈરવવેષં કષ્ટહરમ્ ॥ ૮॥

ઇતિ શ્રીભૈરવતાણ્ડવસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

---

*Shri Bhairava Tandava Stotram*
pdf was typeset on February 14, 2024

Please send corrections to *sanskrit@cheerful.com*